PAPER - 6

# MT

2018 .... .... 1100 Seat No. | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER -VI**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

केचन जनाः कार्यालयेषु अधिकमूल्यं ददाति यतः ........... ।

(ते स्वकार्यस्य सत्वरसिद्धिम् इच्छन्ति / ते अधिकमूल्येन जनसेवां कर्तुमिच्छन्ति)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

केषां कृते कार्यसिद्धिः कष्टसाध्या भवति ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कस्यापि वस्तुनः उचितं मूल्यं दत्त्वैव क्रयणमुचितम् ।

जनकः - श्रुणु तर्हि । केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं, नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः ।

कुमारः - स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया । किमेष अवैधाचारः ?

जनकः - अथ किम् । महानेष अपराधः । यतः तेन विधिभङ्ग भवति अवैधाचारेण भ्रष्टजनानां कार्यसिद्धिः भवति किन्तु तेन जनसामान्याः स्वाधिकारवञ्चिताः भवन्ति । कार्यसिद्ध्यर्थं वैधाचारः उचितः । अतः कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम् ।

कुमारः - किन्तु भवत्सदृशानां केषांचिज्जनानामेव मतिरेषा । न्याय्यपथानुसारिणः सत्यमार्गगामिनः तु कार्यसिद्धिः नित्यमेव कष्टसाध्या भवति । अङ्गुलिमात्रगणनीयानां धीराणां न्याय्यमार्गानुसारेण किम् ?

जनकः - जात, पश्य एकोऽपि चन्द्रमाः तमो हन्ति विश्वं धवलयति च । एवमेव एकोऽपि सत्यगामी मनुजः समस्तं जनसमूहं प्रेरयति । न्याय्यपथगामिनः विरलाः जनाः समाजं परिवर्तयितुं समर्थाः । यथा दीपेनैकेन दीपमाला प्रज्ज्वाल्यते तथा एकस्य वैधाचारेण अन्ये जनाः वैधाचारिणः भवेयुः।

कुमारः - ज्ञातं मया, तात । अद्यप्रभृति वैधमार्गमेवानुसरामि ।

**२. स्वमतप्रकटनम् ।** २

अवैधचारः नाम किम् ? अस्माकं जीवने तत् कथं हानिकारकम् इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

१) पिरॅमिडरचनार्थं जगति विख्यातः देशः .......... । (मिस्रः / रोमः / चीनः)

२) रिडिमर शब्दस्य अर्थः ............. । (पुत्तलः / क्रुसाकारः / तारकः)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

सप्तमम् आश्चर्यं कुत्र वर्तते ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

शिंगहाउन-टी-नृपेण चिचेन् इट्झा नगरी निर्मिता ।

> प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम् - फेव्हिन - अम्फीथिएटरम् एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राट्-व्हेस्पॅशियनमहोदयेन निर्मितम् । द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः । उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउन-टी-नृपेण निर्मितैषा । त्वं जानास्येव । यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः । एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा । एतदभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम् । शाहजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम् । पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च । पञ्चममाश्चर्यं नाम ब्राझिलदेशे 'रिओ-डि-जानिरोनगरसमीपे पर्वतस्थः ख्रिस्त-दि-रिडिमर' इति पुत्तलः । रिडिमर नाम तारकः एषः क्रुसाकारे विराजते । मेक्सिकोदेशे विराजमाना 'मायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम्। अपि ज्ञायते त्वया यद् मायासंस्कृतिरतिप्राचीना विकसिता चासीत् । जार्डनदेशस्था प्राचीना नगरी पेट्रा आश्चर्यगणेषु सप्तमा । रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे विकसितैषा नगरी महत्त्वपूर्णं व्यापारकेन्द्रमासीत्।

**२. पृथक्करणम् ।** २

ताजमहालः

| निर्माता | प्रयोजनम् | प्रतीकम् | शोभा |
|---|---|---|---|
| | | | |

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) कीर्तिः, ख्यातिः, स्तुतिः, प्रसिद्धिः

२) रुग्णः, रोगी, वैद्यः, व्याधिग्रस्तः

(ii) गद्यांशात्  आगते विशेषणे चित्वा लिखत ।

......... सेवाभावः । ........... आवाम् ।

(iii) गद्यांशात् चित्वा द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत । १

अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम्?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति ।'' तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । 'येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम् ?' इति राज्ञा पृष्टे नागार्जुनोऽभणत्,''एतेन रोगिणः सेवा कृता, मानवता दर्शिता । सेवाभावेन विना कथं चिकित्सको भवेत् ? अतः अस्यैव नियुक्तिः मया कृता ।'' सेवाभावः परमगहनोऽतः स एव परीक्षणीयः इति यत् कथ्यते तद्यथार्थमेव ।

**२. पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) द्वावपि युवकौ मार्गे रुग्णमपश्यताम् ।

(ii) द्वितीयं युवकं नागार्जुनेन सहायकत्वेन स्वीकृतवान् ।

(iii) प्रथमः युवकः रसायनं कृत्वा आनीतवान् ।

(iv) नागार्जुनः युवकाभ्याम् औषधं निर्मातुं कथितवान् ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. पृथक्करणम् । स्वभावविशेषान् लिखित्वा जालचित्रं पूरयत ।** २




तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ते त्यजन्ति ततः स्थानं प्रतिलोम्यान्न वेतसः ।।१।।
वेतसो वेगमायातं दृष्ट्वा नमति नापरे ।
सरिद्वेगे व्यतिक्रान्ते स्थानमासाद्य तिष्ठति ।।२।।
कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः ।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ।।३।।
एवमेव यदा विद्वान् मन्यतेऽतिबलं रिपुम् ।
संश्रयेद् वैतसीं वृत्तिमेतत् प्रज्ञानलक्षणम् ।।४।।

२. **शब्दज्ञानम् ।** १

**मेलनं कुरुत ।**

| | अ | ब |
|---|---|---|
| (१) | द्रुमाः | सागरः । |
| (२) | नदी | तीरः । |
| (३) | समुद्रः | मत्तः । |
| (४) | कूलम् | तटिनी । |
| | | वृक्षाः । |

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

ज्ञानतेजसो महान् निधिस्त्वं दयाघनस्त्वं तपोनिधिस्त्वम् ।
अनिशं शिष्यहितस्य चिन्तनं गुरुचरणाभ्यां सदा वन्दनम् ॥१॥
कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ॥२॥
विख्यातनाम्नी खलु जोनदेवी सुमार्गमध्येऽस्ति तदीयमूर्तिः ।
अश्वाधिरूढा स्वकरे गृहीत्वा ध्वजं समुत्तोल्य विराजते सा ॥३॥
यस्यामनेका खलु सेतुबन्धैः विराजते सीनसरित्सुबद्धा ।
नदीं पुरी सापि नदी पुरीञ्च परस्परं भूषयतोऽत्र मन्ये ॥४॥

१. **अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । के परस्परं भूषयतः? १

२. **तात्पर्यलेखनम् ।** २

प्रथमस्य तथा द्वितीय-श्लोकस्य आधारेण गुरुमहत्त्वं माध्यमभाषया स्पष्टीकुरुत ।

**प्र.२ क) स्मरणम् ।**

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) साम्नैव ........ पटोलेन ॥

(ii) अद्रोहः ....... प्रशस्यते ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | पात्रापात्रविवेको हि | १) मृदुना कूर्चकेन च । |
| (ii) | एकैकं घर्षयेद्दन्तं | २) वासरान्ते पिबेत् पयः। |
| (iii) | भोजनान्ते पिबेत्तक्रं | ३) निरम्बुपानाच्च स एव दोषः। |
| (iv) | अत्यम्बुपानान्न विपच्यतेऽन्नं | ४) धेनुपन्नगयोरिव । |
| | | ५) दन्तमांसान्यबाधयन् । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | पञ्चमी एकवचन | सप्तमी बहुवचन | प्रथमा एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(तेषु, निवासी, भवत्याः, कार्यालयेषु, सर्वम्, वस्तुनः)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(दास्ये, जानते, समजायत, ययौ, भुञ्जीरन्, गृह्णातु)

**इ) समासाः । कोष्ठकपूर्तिं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | **समस्तपदम्** | **विग्रहः** | **नाम** |
|---|---|---|---|
| (i) | करुणार्द्रः | करुणया आर्द्रः । | ........... |
| (ii) | निषिद्धाचरणम् | ............. । | कर्मधारय समास । |
| (iii) | अवर्णनीया | न वर्णनीया । | ............. |
| (iv) | विहारार्थम् | ............. । | चतुर्थी तत्पुरुष समास । |
| (v) | पात्रापात्रम् | पात्रं च अपात्रं च एतयोः समाहारः । | ............. |
| (vi) | स्वार्थसिद्धये | ............. । | षष्ठी तत्पुरुष समास । |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) उचितं ............ विना पापान्मुक्तिरशक्या । (प्रायश्चित्तम् / प्रायश्चित्तेन / प्रायश्चित्तात्)

(ii) ............ प्रविश्य अर्जुनः तत्रैव स्थितः । (कोटरेण / कोटरं / कोटराः)

(iii) ............ उपरि मर्कटाः उपविशन्ति । (वृक्षस्य / वृक्षे / वृक्षम्)

(iv) सेन्ट्-चेपलम् इति आराधनमन्दिरं .......... समीपे अस्ति ।
( न्यायप्रासादं / न्यायप्रासादस्य / न्यायप्रासादात्)

(v) यात्री .............. प्राप्य गङ्गातीरे आटत् । (काशी / काशीं / काश्यां)

(vi) ........... मा कुरु । (शोकं / शोकेन / शोकात्)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ........... = उभौ + अपि ।

(ii) अस्यैव = ....... + एव।

(iii) नावलोकितम् = न + ....... ।

(iv) कृतेऽपि = ........ + अपि ।

(v) मुहुर्मुहुर्वारि = मुहुः + ....... + वारि ।

(vi) मूर्तिकारस्त्वम् = ........ + त्वम् ।

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) संवत्सरे .............. अयने स्तः । (2)

(ii) मम जन्मदिवसे मातामही ............... पक्वान्नानि करोति । (5)

(iii) कालिदासेन .................. नाटकानि लिखितानि । (3)

(iv) श्रीकृष्णः देवक्याः .................. अपत्यम् । (8th)

(v) मया ................ अपि विदेशयात्रा न कृता । (once)

(vi) सप्ताहस्य ............... अहं मन्दिरं गच्छामि । (thrice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।**

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।** ४

| | | |
|---|---|---|
| मधुमक्षिकाः | मधु | भ्रमन्ति । |
| वानराः | पुष्पात् पुष्पं | खादन्ति । |
| भ्रमराः | फलानि | कूर्दन्ति । |
| भल्लूकाः | वृक्षात् वृक्षं | सञ्चिन्वन्ति । |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

अधुना सर्वत्र सन्तगाडगेबाबा - नागरी स्वच्छताभियानस्य ............ भवति । एतद् अभियानं तु अतीव उपयुक्तम् । स्वच्छतायाः महत्त्वं तु सर्वे जानन्ति । किन्तु न केवलं स्वगृहस्य स्वच्छता अपि तु परिसरस्य स्वच्छतात्र ............ । सुहृदः, अत्र एकत्रीभूय वयं सर्वे अस्मिन् अभियाने सहभागिनः भवेम तथा तस्य लाभार्थिनः अपि भवेम। एकस्मिन् दिने किमपि ............ जायते । किन्तु सर्वत्र ............ अल्पसमूहैः अङ्गीकृतं स्वच्छताभियानं शनैः शनैः सफलीभवेत् ।

(परिवर्तनम्, अभिप्रेता, विविधैः, प्रसारः)

**Best of Luck**